# ॥ श्रीगोविंदाष्टकम् ॥

सत्यं ज्ञानमनंतं नित्यमनाकाशं परमाकाशम् ।
गोष्ठप्राङ्गणरिङ्खणलोलमनायासं परमायासम् ।
मायाकल्पितनानाकारमनाकारं भुवनाकारम् ।
क्ष्माया नाथमनाथं प्रणमत गोविंदं परमानंदम् ॥ १ ॥

मृत्स्नामत्सीहेति यशोदाताडनशैशव संत्रासम् ।
व्यदितवक्त्रालोकितलोकालोकचतुर्दशलोकालिम् ।
लोकत्रयपुरमूलस्तंभं लोकालोकमनालोकम् ।
लोकेशं परमेशं प्रणमत गोविंदं परमानंदम् ॥ २ ॥

त्रैविष्टपरिपुवीरघ्नं क्षितिभारघ्नं भवरोगघ्नम् ।
कैवल्यं नवनीताहारमनाहारं भुवनाहारम् ।
वैमल्यस्फुटचेतोवृत्तिविशेषाभासमनाभासम् ।
शैवं केवलशांतं प्रणमत गोविंदं परमानंदम् ॥ ३ ॥

गोपालं प्रभुलीलाविग्रहगोपालं कुलगोपालम् ।
गोपीखेलनगोवर्धनधृतिलीलालालितगोपालम् ।
गोभिर्निगदित गोविंदस्फुतनामानं बहुनामानम् ।
गोपीगोचरपथिकं प्रणमत गोविंदं परमानंदम् ॥ ४ ॥

गोपीमंडलगोष्ठिभेदं भेदावस्थमभेदाभम् ।
शश्वद्गोखुरनिर्घूतोद्धतधूलीधूसरसौभाग्यम् ।
श्रद्धाभक्तिगृहीतानंदमचिन्त्यं चिंतितसद्भावम् ।
चिंतामणिमहिमानं प्रणमत गोविंदं परमानंदम् ॥ ५ ॥

स्नानव्याकुलयोशिद्वस्त्रमुपादायागमुपारूढम्  ।
व्यदित्संतिरथ दिग्वस्त्रा ह्युपुदातुमुपाकर्षंतम्  ।
निर्धूतद्वयशोकविमोहं बुद्धं बुद्धेरंतस्थम्  ।
सत्तामात्रशरीरं प्रणमत गोविंदं परमानंदम्  ॥ ६ ॥

कांतं कारणकारणमादिमनादिं कालमनाभासम्  ।
कालिंदीगतकालियशिरसि मुहुर्नृत्यंतं नृत्यंतम्  ।
कालं कालकलातीतं कलिताशेषं कलिदोषघ्नम्  ।
कालत्रयगतिहेतुं प्रणमत गोविंदं परमानंदम्  ॥ ७ ॥

वृंदावनभुवि वृंदारकगणवृन्दाराध्यं वंदेऽहम्  ।
कुंदाभामलमंदस्मेरसुधानंदं सुहृदानंदम्  ।
वंद्याशेषमहामुनिमानसवंद्यानंदपदद्वंद्वम्  ।
वंद्याशेषगुणाब्धिं प्रणमत गोविंदं परमानंदम्  ॥ ८ ॥

गोविंदाष्टकमेतदधीते गोविंदार्पितचेता यो  ।
गोविंदाच्युत माधव विष्णो गोकुलनायक कृष्णेति  ।
गोविंदाङ्घ्रिसरोजध्यानसुधाजलधौतसमस्ताघो  ।
गोविंदं परमानंदामृतमंतःस्थं स तमभ्येति  ॥

॥ इति श्रीमच्छङ्कराचार्यविरचितं श्रीगोविंदाष्टकं संपूर्णम्  ॥

---